# Narsingh Kavach(**नरसिंह कवच**)

## **नरसिंह कवच**- **मूल संस्कृत पाठ** (Narsingh Kavach In Hindi)

**श्लोक 1**

**नृसिंह कवचम वक्ष्येऽ प्रह्लादनोदितं पुरा ।**
**सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनं ॥**

**श्लोक 2**

**सर्वसंपत्करं चैव स्वर्गमोक्षप्रदायकम ।**
**ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितं ॥**

**श्लोक 3**

**विवृतास्यं त्रिनयनं शरदिंदुसमप्रभं ।**
**लक्ष्म्यालिंगितवामांगम विभूतिभिरुपाश्रितं ॥**

**श्लोक 4**

**चतुर्भुजं कोमलांगम स्वर्णकुण्डलशोभितं ।**
**ऊरोजशोभितोरस्कं रत्नकेयूरमुद्रितं ॥**

**श्लोक 5**

**तप्तकांचनसंकाशं पीतनिर्मलवासनं ।**
**इंद्रादिसुरमौलिस्थस्फुरन्माणिक्यदीप्तिभि: ॥**

**श्लोक 6**

**विराजितपदद्वंद्वं शंखचक्रादिहेतिभि: ।**
**गरुत्मता च विनयात स्तूयमानं मुदान्वितं ॥**

**श्लोक 7**

**स्वहृतकमलसंवासम कृत्वा तु कवचम पठेत**
**नृसिंहो मे शिर: पातु लोकरक्षात्मसंभव: ।**
**सर्वगोऽपि स्तंभवास: फालं मे रक्षतु ध्वनन ।**
**नरसिंहो मे दृशौ पातु सोमसूर्याग्निलोचन: ॥**

**श्लोक 8**

श्रृती मे पातु नरहरिर्मुनिवर्यस्तुतिप्रिय: ।
नासां मे सिंहनासास्तु मुखं लक्ष्मिमुखप्रिय: ॥

**श्लोक 9**

सर्वविद्याधिप: पातु नृसिंहो रसनां मम ।
वक्त्रं पात्विंदुवदन: सदा प्रह्लादवंदित: ॥

**श्लोक 10**

नृसिंह: पातु मे कण्ठं स्कंधौ भूभरणांतकृत ।
दिव्यास्त्रशोभितभुजो नृसिंह: पातु मे भुजौ ॥

**श्लोक 11**

करौ मे देववरदो नृसिंह: पातु सर्वत: ।
हृदयं योगिसाध्यश्च निवासं पातु मे हरि: ॥

**श्लोक 12**

मध्यं पातु हिरण्याक्षवक्ष:कुक्षिविदारण: ।
नाभिं मे पातु नृहरि: स्वनाभिब्रह्मसंस्तुत: ॥

**श्लोक 13**

ब्रह्माण्डकोटय: कट्यां यस्यासौ पातु मे कटिं ।
गुह्यं मे पातु गुह्यानां मंत्राणां गुह्यरुपधृत ॥

**श्लोक 14**

ऊरु मनोभव: पातु जानुनी नररूपधृत ।
जंघे पातु धराभारहर्ता योऽसौ नृकेसरी ॥

**श्लोक 15**

सुरराज्यप्रद: पातु पादौ मे नृहरीश्वर: ।
सहस्त्रशीर्षा पुरुष: पातु मे सर्वशस्तनुं ॥

**श्लोक 16**

महोग्र: पूर्वत: पातु महावीराग्रजोऽग्नित: ।
महाविष्णुर्दक्षिणे तु महाज्वालस्तु निर्रुतौ ॥

**श्लोक 17**

पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुख: ।
नृसिंह: पातु वायव्यां सौम्यां भूषणविग्रह: ॥

**श्लोक 18**

ईशान्यां पातु भद्रो मे सर्वमंगलदायक: ।
संसारभयद: पातु मृत्यूर्मृत्युर्नृकेसरी ॥

**श्लोक 19**

इदं नृसिंहकवचं प्रह्लादमुखमंडितं ।
भक्तिमान्य: पठेन्नित्यं सर्वपापै: प्रमुच्यते ॥

**श्लोक 20**

पुत्रवान धनवान लोके दीर्घायुर्उपजायते ।
यंयं कामयते कामं तंतं प्रप्नोत्यसंशयं ॥

**श्लोक 21**

सर्वत्र जयवाप्नोति सर्वत्र विजयी भवेत ।
भुम्यंतरिक्षदिवानां ग्रहाणां विनिवारणं ॥

**श्लोक 22**

वृश्चिकोरगसंभूतविषापहरणं परं ।
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणं ॥

**श्लोक 23**

भूर्जे वा तालपत्रे वा कवचं लिखितं शुभं ।
करमूले धृतं येन सिद्ध्येयु: कर्मसिद्धय: ॥

**श्लोक 24**

देवासुरमनुष्येशु स्वं स्वमेव जयं लभेत ।
एकसंध्यं त्रिसंध्यं वा य: पठेन्नियतो नर: ॥

**श्लोक 25**

सर्वमंगलमांगल्यंभुक्तिं मुक्तिं च विंदति ।
द्वात्रिंशतिसहस्राणि पाठाच्छुद्धात्मभिर्नृभि: ।
कवचस्यास्य मंत्रस्य मंत्रसिद्धि: प्रजायते ।
आनेन मंत्रराजेन कृत्वा भस्माभिमंत्रणम ॥

**श्लोक 26**

तिलकं बिभृयाद्यस्तु तस्य गृहभयं हरेत ।
त्रिवारं जपमानस्तु दत्तं वार्यभिमंत्र्य च ॥

**श्लोक 27**

**प्राशयेद्यं नरं मंत्रं नृसिंहध्यानमाचरेत ।**
**तस्य रोगा: प्रणश्यंति ये च स्यु: कुक्षिसंभवा: ॥**

**श्लोक 28**

**किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत ।**
**मनसा चिंतितं यस्तु स तच्चाऽप्नोत्यसंशयं ॥**

**श्लोक 29 (ध्यान श्लोक)**

**गर्जंतं गर्जयंतं निजभुजपटलं स्फोटयंतं**
**हरंतं दीप्यंतं तापयंतं दिवि भुवि दितिजं क्षेपयंतं रसंतं ।**
**कृंदंतं रोषयंतं दिशिदिशि सततं संभरंतं हरंतं ।**
**विक्षंतं घूर्णयंतं करनिकरशतैर्दिव्यसिंहं नमामि ॥**

## नरसिंह कवच- सरल हिंदी ट्रांसलिटरेशन (English Transliteration)

**Shlok 1**

**Nrisimha kavacham vakshye pralhadenoditam pura,**
**Sarva-rakshakaram punyam sarvopadrava-nashanam.**

**Shlok 2**

**Sarva-sampatkaram chaiva svarga-moksha-pradayakam,**
**Dhyatva nrisimham devesham hema-simhasana-sthitam.**

**Shlok 3**

**Vivritasyam trinayanam sharad-indu-sama-prabham,**
**Lakshmyalingita-vamangam vibhutibhir-upashritam.**

**Shlok 4**

**Chaturbhujam komalangam svarna-kundala-shobhitam,**
**Urojashobhitoraskam ratna-keyura-mudritam.**

**Shlok 5**

**Tapta-kanchana-sankasham pita-nirmala-vasanam,**
**Indradi-sura-maulistha-sphuran-manikya-diptibhih.**

**Shlok 6**

**Virajita-pada-dvandvam shankha-chakradi-hetibhih,**
**Garutmata cha vinayat stuyamanam mudanvitam.**

**Shlok 7**

Sva-hrit-kamala-sanvasam kritva tu kavacham pathet,
Nrisimho me shirah patu loka-rakshatma-sambhavah.
Sarvago api stambhavasah phalam me rakshatu dhvanan,
Narasimho me drishau patu soma-surya-agni-lochanah.

**Shlok 8**

Shruti me patu narahari-munivarya-stuti-priyah,
Nasam me simha-nasastu mukham lakshmi-mukha-priyah.

**Shlok 9**

Sarva-vidyadhipah patu nrisimho rasanam mama,
Vaktram patvindu-vadanah sada pralhada-vanditah.

**Shlok 10**

Nrisimhah patu me kantham skandhau bhu-bharananta-krit,
Divyastra-shobhita-bhujo nrisimhah patu me bhujau.

**Shlok 11**

Karau me deva-varado nrisimhah patu sarvatah,
Hridayam yogi-sadhyashcha nivasam patu me harih.

**Shlok 12**

Madhyam patu hiranyaksha-vaksha-kukshi-vidaranah,
Nabhim me patu nrihari svanabhi-brahma-sanstutah.

**Shlok 13**

Brahmanda-kotayah katyam yasyasau patu me katim,
Guhyam me patu guhyanam mantranam guhya-rupadhrit.

**Shlok 14**

Uru manobhavah patu januni nara-rupadhrit,
Janghe patu dhara-bhara-harta yosau nrikesari.

**Shlok 15**

Sura-rajyapradah patu padau me nrihareshvarah,
Sahasra-shirsha purushah patu me sarvashastanum.

**Shlok 16**

Mahograh purvatah patu mahavir-agrajo agnitah,
Mahavishnur dakshine tu mahajvalastu nirrutau.

**Shlok 17**

**Pashchime patu sarveso dishi me sarvatomukhah,**
**Nrisimhah patu vayavyam saumyam bhushana-vigrahah.**

**Shlok 18**

**Ishanyam patu bhadro me sarva-mangala-dayakah,**
**Sansara-bhayadah patu mrityor-mrityur-nrikesari.**

**Shlok 19**

**Idam nrisimha-kavacham pralhada-mukha-mandritam,**
**Bhaktiman yah pathennityam sarva-papaih pramuchyate.**

**Shlok 20**

**Putravan dhanavan loke dirghayurupajayate,**
**Yam yam kamayate kamam tam tam prapnotyasanshayam.**

**Shlok 21**

**Sarvatra jayamapnoti sarvatra vijayi bhavet,**
**Bhumyantariksha-divanam grahanam vinivaranam.**

**Shlok 22**

**Vrishchikoraga-sambhuta-vishapaharanam param,**
**Brahmarakshasa-yakshanam durotsaranakaranam.**

**Shlok 23**

**Bhurje va talapatre va kavacham likhitam shubham,**
**Karamule dhritam yena siddhyeyuh karmasiddhayah.**

**Shlok 24**

**Devasura-manushyeshu svam svameva jayam labhet,**
**Ekasandhyam trisandhyam va yah pathenniyato narah.**

**Shlok 25**

**Sarva-mangala-mangalyam bhuktim muktim cha vindati,**
**Dvatrimshati-sahasrani pathachchhuddhatmabhirnribhih.**
**Kavachasyasya mantrasya mantrasiddhih prajayate,**
**Anena mantrarajena kritva bhasmabhimantranam.**

**Shlok 26**

**Tilakam bibhryadyastu tasya grihabhayam haret,**
**Trivaram japamanastu dattam varyabhimantrya cha.**

**Shlok 27**

**Prashayed yam naram mantram nrisimha-dhyanam acharet,**
**Tasya rogah pranashyanti ye cha syuh kukshisambhavah.**

**Shlok 28**

**Kimatra bahunoktena nrisimha-sadrisho bhavet,**
**Manasa chintitam yastu sa tachchapnotyasanshayam.**

**Shlok 29 (Dhyan Shlok)**

**Garjantam garjayantam nija-bhuja-patalam sphotayantam,**
**Harantam dipyantam tapayantam divi bhuvi ditijam kshepayantam rasantam,**
**Krindantam roshayantam dishi-dishi satatam sambharantam harantam,**
**Vikshantam ghurnayantam kara-nikara-shatair-divya-simham namami.**